শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৯

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৯

*জগতসৃষ্টিপ্ৰকারৱৰ্ণনম্*

স্থিতঃ স কমলোদ্ভৱস্তৱ হি নাভিপঙ্কেরুহে
কুতস্বিদিদমম্বুধাৱুদিতমিত্যনালোকযন্।
তদীক্ষণকুতূহলাত্ প্ৰতিদিশং ৱিৱৃত্তানন-
শ্চতুৰ্ৱদনতামগাদ্বিকসদষ্টদৃষ্ট্যম্বুজাম্॥ ১ ॥

মহাৰ্ণৱৱিঘূৰ্ণিতং কমলমেৱ তত্ কেৱলং
ৱিলোক্য তদুপাশ্ৰযং তৱ তনুং তু নালোকযন্।
ক এষ কমলোদরে মহতি নিসসহাযো হ্যহং
কুতসস্বিদিদমম্বুজং সমজনীতি চিন্তামগাত্॥ ২ ॥

অমুষ্য হি সরোরুহঃ কিমপি কারণং সম্ভৱে-
দিতি স্ম কৃতনিশ্চযসস খলু নালরন্ধ্ৰাধৱনা।
স্বযোগবলৱিদ্যযা সমৱরূঢৱান্ প্ৰৌঢধী-
স্তৱদীযমতিমোহনং ন তু কলেবরং দৃষ্টৱান্॥ ৩ ॥

ততসসকলনালিকাৱিৱরমাৰ্গগো মাৰ্গযন্
প্ৰযস্য শতৱতসরং কিমপি নৈৱ সন্দৃষ্টৱান্।
নিৱৃত্য কমলোদরে সুখনিষণ্ণ একাগ্ৰধীঃ
সমাধিবলমাদধে ভৱদনুগ্ৰহৈকাগ্ৰহী॥ ৪ ॥

শতেন পরিৱতসরৈৰ্দৃঢসমাধিবন্ধোল্লসত্
প্ৰবোধৱিশদীকৃতসস খলু পদ্মিনীসম্ভৱঃ।
অদৃষ্টচরমদভুতং তৱ হি রূপমন্তৰ্দৃশা
ৱ্যচষ্ট পরিতুষ্টধীৰ্ভুজগভোগভাগাশ্ৰযম্॥ ৫ ॥

কিরীটমকুটোল্লসত্ কটকহারকেযূরযুঙ-
মণিস্ফুরিতমেখলং সুপরিৱীতপীতাংবরম্।
কলাযকুসুমপ্রভং গলতলোল্লসতকৌস্তুভং
ৱপুস্তদযি ভাৱযে কমলজন্মনে দর্শিতম্॥ ৬ ॥

শ্রুতিপ্রকরদর্শিতপ্রচুরৱৈভৱ শ্রীপতে
হরে জয জয প্রভো পদমুপৈষি দিষ্ট্যা দৃশোঃ।
কুরুষৱ ধিযমাশু মে ভুৱননির্মিতৌ কর্মঠা-
মিতি দ্রুহিণৱর্ণিতস্বগুণবংহিমা পাহি মাম্॥ ৭ ॥

লভস্ব ভুৱনত্রযীরচনদক্ষতামক্ষতাং
গৃহাণ মদনুগ্রহং কুরু তাশ্চ ভূযো ৱিধে।
ভৱত্বখিলসাধনী মযি চ ভক্তিরত্যুতকটে-
ত্যুদীর্য গিরমাদধা মুদিতচেতসং ৱেধসম্॥ ৮ ॥

শতং কৃততপাস্ততসস খলু দিৱ্যসংৱতসরা-
নৱাপ্য চ তপোবলং মতিবলং চ পূর্ৱাধিকম্।
উদীক্ষ্য কিল কম্পিতং পযসি পঙ্কজং ৱাযুনা
ভৱদবলৱিজৃম্ভিতঃ পৱনপাথসী পীতৱান্॥ ৯ ॥

তৱৈৱ কৃপযা পুনসসরসিজেন তেনৈৱ স
প্রকল্প্য ভুৱনত্রযীং প্রৱৱৃতে প্রজানির্মিতৌ।
তথাৱিধকৃপাভরো গুরুমরুতপুরাধীশ্বর
ত্বমাশু পরিপাহি মাং গুরুদযোক্ষিতৈরীক্ষিতৈঃ॥ ১০ ॥

**********